श्री तारा प्रत्यंगिरा कवचं | रक्षणकर मंत्र कवचं

श्री तारा प्रत्यंगिरा कवचं

तारायाः स्तंभिनी देवी मोहिनी क्षोभिणी तथा ।
जृंभिणी भ्रामिणी रौद्री संहारिण्यपि तारिणी ॥1॥

शक्तयोरष्टौ क्रमादेता शत्रुपक्षे नियोजिताः ।
धारिता साधकेंद्रेण सर्वशत्रुनिवारिणी ॥2॥

ॐ स्तंभिनी स्त्रीं स्त्रीं मम शत्रून् स्तंभय स्तंभय ॥3॥
ॐ मोहिनी स्त्रीं स्त्रीं मम शत्रून् मोहय मोहय ॥4॥
ॐ क्षोभिणी स्त्रीं स्त्रीं मम शत्रून् क्षोभय क्षोभय ॥5॥
ॐ जृंभिणी स्त्रीं स्त्रीं मम शत्रून् जृंभय जृंभय ॥6॥
ॐ भ्रामिणी स्त्रीं स्त्रीं मम शत्रून् भ्रामय भ्रामय ॥7॥
ॐ रौद्री स्त्रीं स्त्रीं मम शत्रून् संतापय संतापय ॥8॥
ॐ संहारिणी स्त्रीं स्त्रीं मम शत्रून् संहारय संहारय ॥9॥
ॐ तारिणी स्त्रीं स्त्रीं सर्वापद्भ्यः सर्वभूतेभ्यः सर्वत्र मां रक्ष रक्ष स्वाहा ॥10॥

फलश्रुतिः –
य इमां धारयेद्विद्यां त्रिसंध्यं वाऽपि यः पठेत् ।
स दुःखं दूरतस्त्यक्त्वा हन्याच्छत्रून् न संशयः ॥11॥

रणे राजकुले दुर्गे महाभये विपत्तिषु ।
विद्या प्रत्यंगिरा ह्येषा सर्वतो रक्षयेन्नरं ॥12॥

अनया विद्यया रक्षां कृत्वा यस्तु पठेत् सुधी ।
मंत्राक्षरमपि ध्यायन् चिंतयेन्नीलसरस्वतीं ॥13॥

अचिरेनैव तस्यासन् करस्था सर्वसिद्धयः ।
ॐ ह्रीं उग्रतारायै नीलसरस्वत्यै नमः ॥14॥

इदं कवचं धीयानो नित्यं (यो) धारयेन्नरः ।
न क्वापि भयमाप्नोति सर्वत्र जयमाप्नुयात् ॥15॥

इति श्रीरुद्रयामले श्रीमदुग्रतरा प्रत्यंगिरा कवचं ।